## द्वितीयः पाठः

# कूर्मशशककथा

(लङ्लकार)

[इस पाठ में एक कछुए और एक खरहे की कथा है। दोनों मित्र थे तथा एक वन में सरोवर के निकट रहते थे। उनमें एक अन्य सरोवर के पास पहुँचने की प्रतिस्पर्धा हुई। खरहा तो अपनी तेज गति के अहंकार में कुछ दूर चलकर आराम करने लगा किंतु कछुआ धीमी गति से निरन्तर चलता रहा। उसने प्रतिस्पर्धा जीत ली। इस पाठ से शिक्षा मिलती है कि नियमित रूप से परिश्रम किया जाय तो मंद बुद्धि वाला भी जीवन में बहुत आगे निकल सकता है।]



चम्पारण्ये सरोवरे एकः कूर्मः निवसति स्म। तस्य मित्रता शशकेन अभवत्। तौ सर्वदा एकत्र स्थित्वा नाना कथाः कथयतः। परस्परम् आलापेन तयोः मित्रता दृढा जाता। एकदा तौ विचारं कृतवन्तौ यत् वनस्य उपान्ते गन्तव्यम्। आवयोः मध्ये कः तत्र प्रथमं गच्छेत्? कूर्मः अकथयत् – अहमेव तत्र प्रथमं गमिष्यामि। शशकः अहसत् – त्वं तु शनैः-शनैः चलसि। कथं तत्र प्रथमं गमिष्यसि? अहमेव तत्र प्रथमं प्राप्स्यामि।

कूर्मः नियमस्य पालकः सदा परिश्रमी च आसीत्। सः शनैः-शनैः किन्तु निरन्तरं चलितः। शशकः दीर्घकालं मार्गे विरम्य पुनः तीव्रया गत्या अचलत्। यदा स वनस्य उपान्तं

प्राप्तवान् तदा अपश्यत् यत् कूर्मः पूर्वमेव तत्र अवस्थितः अस्ति । शशकः लज्जितः जातः । सत्यमुक्तम् - **निरन्तरं श्रमेण असम्भवम् अपि कार्यं सम्भवति** । क्व कूर्मस्य मन्थरगतिः, क्व शशकस्य तीव्रगतिः । किन्तु कूर्मः निरन्तरं कार्येण विजयी अभवत् ।

## शब्दार्थः

| | | |
|---|---|---|
| **अरण्ये** | = | जंगल में |
| **सरोवरे** | = | तालाब में |
| **कूर्मः** | = | कछुआ |
| **निवसति स्म** | = | रहता था / रहती थी |
| **शशकः** | = | खरगोश, खरहा |
| **अभवत्** | = | हुआ |
| **तौ** | = | वे दोनों |
| **स्थित्वा** | = | रह कर |
| **कथयतः** | = | दोनों कहते हैं |
| **परस्परम्** | = | आपस में |
| **आलापेन** | = | बातचीत के द्वारा |
| **जाता** | = | हुई |
| **एकदा** | = | एक बार |
| **कृतवन्तौ** | = | किया (द्वि०व०) |
| **यत्** | = | कि |
| **उपान्ते** | = | (दूसरे) छोर / किनारे पर |

| | | |
|---|---|---|
| गन्तव्यम् | = | जाना चाहिए |
| आवयो: | = | हमदोनों के |
| क: | = | कौन |
| तत्र | = | वहाँ |
| गच्छेत् | = | पहुँचे, जाए |
| अकथयत् | = | कहा |
| अहमेव ( अहम्+एव ) | = | मैं ही |
| अहसत् | = | हँसा |
| तु | = | तो |
| शनै:-शनै: | = | धीरे-धीरे |
| कथम् | = | कैसे |
| गमिष्यसि | = | जाओगे |
| प्राप्स्यामि | = | प्राप्त करूँगा, पहुँचूँगा |
| पालक: | = | पालन करने वाला |
| निरन्तरम् | = | लगातार |
| चलित: | = | चल पड़ा |
| अवस्थित: | = | रुका हुआ/पहुँचा हुआ |
| श्रमेण | = | परिश्रम से |
| सम्भवति | = | संभव होता है |
| मन्थरगति: | = | धीमी चाल वाला |
| क्व | = | कहाँ |
| कार्येण | = | काम से |

# व्याकरणम्

## सन्धि-विच्छेदः

चम्पारण्ये = चम्पा + अरण्ये (दीर्घसन्धिः)

उपान्ते = उप + अन्ते (दीर्घसन्धिः)

चासीत् = च + आसीत् (दीर्घसन्धिः)

## प्रकृति-प्रत्यय-विभागः

स्थित्वा = √स्था + क्त्वा

जातः = √जन् + क्त

गन्तव्यम् = √गम् + तव्यत्

विरम्य = वि + √रम् + ल्यप्

अभवत् = √भू लङ्लकारः, प्रथमपुरुषः, एकवचनम्

कथयतः = √कथ् + लट्लकारः, प्रथमपुरुषः, द्विवचनम्

कृतवन्तौ = √कृ + क्तवतु, द्विवचनम्

गच्छेत् = √गम् , विधिलिङ्, प्रथमपुरुषः, एकवचनम्

अकथयत् = √कथ् , लङ्लकारः, प्रथमपुरुषः, एकवचनम्

# अभ्यासः

## मौखिकः

1. निम्नलिखितानां पदानाम् अर्थं वदत -

अरण्ये, कूर्मः, शशकः, परस्परम्, मन्थरगतिः, दीर्घकालम्, शनैः-शनैः, निरन्तरम्, एकदा ।

2. इमानि पदानि पठत -

| | | |
|---|---|---|
| अभवत् | अभवताम् | अभवन् |
| अपठत् | अपठताम् | अपठन् |
| गच्छेत् | गच्छेताम् | गच्छेयुः |
| वदेत् | वदेताम् | वदेयुः |

## लिखितः

3. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकवाक्येन लिखत -

(क) कस्मिन् अरण्ये एकः कूर्मः निवसति स्म ?

(ख) शशकः कस्य मित्रम् आसीत् ?

(ग) परस्परम् आलापेन तयोः मित्रता कीदृशी जाता ?

(घ) कः विजयी अभवत् ?

(ङ) कः शनैः शनैः चलति ?

(च) तीव्रया गत्या कः चलति ?

(छ) कूर्मः कीदृशः आसीत् ?

4. **मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत-**

| दृष्ट्वा, कूर्मः, कार्यं, परिश्रमी, लज्जितः |
|---|

(क) चम्पारण्ये सरोवरे एकः ........................................ निवसति स्म ।

(ख) परस्परम् आलापेन तयोः मित्रता ..............................जाता ।

(ग) कूर्मः नियमस्य पालकः सदा .............................. च आसीत् ।

(घ) शशकः ................................ जातः ।

(ङ) निरन्तरं श्रमेण असम्भवम् अपि .............................. सम्भवति ।

5. **सुमेलनं कुरुत -**

| 'अ' | 'आ' |
|---|---|
| (क) शशकः | (i) मेहनत से |
| (ख) कूर्मः | (ii) बहुत समय तक |
| (ग) श्रमेण | (iii) तालाब |
| (घ) दीर्घकालम् | (iv) खरगोश |
| (ङ) अरण्ये | (v) कछुआ |
| (च) सरोवरः | (vi) जंगल में |

6. **निम्नलिखितानां पदानां बहुवचनं लिखत -**

(क) गच्छति ..............................................

(ख) करोति ..............................................

(ग) पठति ..............................................

(घ) पश्यामि ..............................................

(ङ) गमिष्यामि ..............................................

(च) चलसि ..............................................

(छ) सम्भवति ..............................................

7. **क्त / क्त्वा प्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत -**

(क) √भज् + क्त = ..............................

(ख) √स्था + क्त्वा = ..............................

(ग) √भू + क्त = ..............................

(घ) √पठ् + क्त = ..............................

(ङ) √हस् + क्त्वा = ..............................

(च) √गम् + क्त्वा = ..............................

8. **संस्कृते अनुवादं कुरुत -**

(क) मैं साइकिल से (द्विचक्रिकया) घर जाता हूँ।

(ख) हम दोनों धीरे-धीरे (शनैः शनैः) उद्यान में टहलते हैं। (अट् = टहलना)

(ग) हमलोग संस्कृत लिखते हैं।

(घ) खरगोश तेज दौड़ता है।

(ङ) कछुआ धीरे-धीरे चलता है।

(च) भारत में छह ऋतुएँ होती हैं।

(छ) वसन्त ऋतुओं का राजा है।

9. **अधोलिखितानां पदानां प्रयोगेण वाक्यानि रचयत -**

एकत्र, उपान्ते, तत्र, विरम्य, प्राप्स्यामि।

10. **पदानि योजयित्वा लिखत -**

(क) अहम् + एव = ..............................

(ख) असम्भवम् + अपि = ..............................

(ग) पूर्वम् + एव = ..............................

(घ) सत्यम् + उक्तम् = ..................................

(ङ) अहम् + अस्मि = ..................................

11. अधोलिखितवाक्येषु 'सत्यम्' 'असत्यम्' वा लिखत -

(क) सरोवरे शशकः निवसति । ( )

(ख) परस्परम् आलापेन तयोः मित्रता जाता । ( )

(ग) कूर्मः मार्गे विरम्य चलितः । ( )

(घ) शशकः तीव्रया गत्या अचलत् । ( )

(ङ) शशकः निरन्तर-श्रमेण विजयी अभवत् । ( )

## योग्यता-विस्तारः

संस्कृत भाषा में पशु–पक्षियों की कथाएँ नीतिकथा (Fable) के रूप में प्राचीन भारत तथा पाश्चात्य देशों में भी प्रचलित थीं । इन मानवेतर प्राणियों को पात्र बनाकर नीतिकथाओं में मनुष्यों को उपदेश दिया जाता है । संस्कृत में पञ्चतन्त्र ऐसी कथाओं का बहुत बड़ा संकलन है । बच्चों के लिए ये कथाएँ मनोरंजन का तो साधन हैं ही, इनसे जीवन में काम देने वाले उपदेश भी मिलते हैं । उपर्युक्त कथा में कूर्म निरन्तर परिश्रम करके सफल होता है जबकि शशक अपनी तीव्र गति पर अहंकार रखने तथा आलस्य के कारण सफल नहीं होता । छात्रों को भी इससे निरन्तर परिश्रम करने का उपदेश मिलता है । अत्यंत साधारण छात्र भी दृढ़ संकल्प करें और सही दिशा में निरन्तर परिश्रम करते रहें तो उनका लक्ष्य दूर नहीं रह सकता ।

*****